# तत्पुरुषसमासान्तर्गत केषाञ्चित् सूत्राणां तात्पर्यम्

**डॉ. रघुवीरप्रसाद शर्मा**
प्राध्यापक
संस्कृत शिक्षा विभाग, राजस्थान सरकार

**तृजकाभ्यां कर्तरि २/२/१५ –**

इदं सूत्रं 'षष्ठी' इति सूत्रस्य–अपवादभूतं वर्तते। षष्ठी इति सूत्रेण षष्ठ्यन्तं सुबन्तेन समस्यते, स तत्पुरुषो भवति। 'राजपुरुषः' इत्यस्मिन् उदाहरणे 'षष्ठी' इति सूत्रेण षष्ठीतत्पुरुषसमासो भवति। राजन् अस् पुरुष स् इत्यलौकिकविग्रहवाक्ये समासे सति सुब्लुकि अन्तर्वर्तिनीं विभक्तिं प्रतयलक्षणेनाश्रित्य नलोपः। न च लुका लुप्तत्वान्न प्रत्ययलक्षणमिति वाच्यम्, पदत्वस्य सुब्घटितसमुदायधर्मत्वेन तस्य अङ्गकार्यत्वाभावात्।

'षष्ठी' इत्यस्मिन् सूत्रे 'प्राक्कडारात् समासः' इत्यतः समासः इति पदम्, 'सह सुपा' इत्यतः सह सुपा 'सुबामन्त्रिते पराङ्गवत् स्वरे' इत्यतः सुप् इति अनुवर्तन्ते। तत्पुरुषः, विभाषा इति सूत्रयोः सम्पूर्णावृत्तिर्भवति। सूत्रे षष्ठी इति पदं तदन्तबोधको वर्तते। तेन 'षष्ठ्यन्तं सुबन्तं', समर्थसुबन्तेन सह विकल्पेन समस्यते इति सूत्रार्थो भवति।

'तृजकाभ्यां कर्तृरि' इति सूत्रं 'षष्ठी' सूत्रस्यापवादकः 'कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः' इति सूत्रवृत्तिरस्ति। सूत्रेऽस्मिन् पूर्व सूत्रात् 'कर्मणि च' इत्यतः, 'कर्मणि' इति अनुवर्तते 'न निर्धारणे' इति सूत्रात् 'न' इति पदस्य तथा 'षष्ठी' इति सूत्रात् 'षष्ठी' इति पदस्यानुवृत्तिः भवति। तेन सूत्रार्थो भवति, कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः।

कर्तरीति तृजकयोः एव विशेषणम् श्रुतत्वात् नतु षष्ठ्याः। ण्वुल्तृचौ इति कर्तरि तृच्। कर्तृमकर्मणोः कृति इति कर्मणि षष्ठी। सूत्रे कतृरि पदं तृच्–अक प्रत्ययोः विशेषणं वर्तते षष्ठ्याः नास्ति। यतो हि सूत्रे एतयोः प्रत्ययोः श्रवणं कृतम्। षष्ठीति पदं तु अनुवृत्तमेवास्ति। अतः सूत्राशयो अस्ति कर्ता कारकस्य अर्थे तृच्–अक प्रत्ययान्तसुबन्तेन सह कर्मणि विहितषष्ठ्याः समासो न भवति।

'अपां स्त्रष्टा' इत्यस्मिन् उदाहरणे सृज् धातो तृच्प्रत्ययत्वात् स्त्रष्टा इति रूपं सिद्धमस्ति अतः 'तृजकाभ्यां कर्तरि' इति सूत्रेण 'षष्ठी' इति सूत्रात् प्राप्तस्य समासस्य बाधो भवति।

'वज्रस्य भर्ता' इत्यस्मिन्नपि उदाहरणे भृ धातो तृच् प्रत्ययत्वात् भर्ता इति सिद्धमस्ति। अतः अत्रापि 'तृजकाभ्यां कर्तरि' इति सूत्रेण 'षष्ठी' इत्यनेन प्राप्तं समासं बाध्यते।

**नित्यं क्रीडाजीविकयोः २/२/१७-**

'तृजकाभ्यां कर्तरि' इति सूत्रस्यापवादभूतमस्ति। इदं सूत्रं विधि सूत्रम् अस्ति। अनेन सूत्रेण नित्यं षष्ठी समस्यते। पूर्वसूत्रेभ्यः सूत्रेऽस्मिन् अक-षष्ठी-तत्पुरुष-सुप्-सहसुपा-समास इत्यादि पदानाम् अनुवृत्तिः आगच्छति। तेन सूत्रार्थो भवति-क्रीडाजीविकयोः अर्थयोरकेन नित्यं षष्ठी समस्यते।

'उद्दालकपुष्पभञ्जिका' इत्यस्मिन् उदाहरणे उद्दालकः श्लेष्मातकः तस्य पुष्पाणि, तेषां भञ्जनम् इत्यस्वपदविग्रहः। 'स्त्रियां क्तिन्' इत्यधिकारे 'धात्वर्थनिर्देशे ण्वुल्' इति भावे ण्वुलित्येव युक्तम्। संज्ञायाम् इति तु अधिकारणार्थमिति कृदन्ते वक्ष्यते। तथा सति उद्दालकपुष्पाणि भज्यन्ते यस्यां क्रीडायाम् इति विग्रहः।

अत्र 'षष्ठी' इति सूत्रेण समासः प्राप्तः किन्तु 'विभाषा' इति सूत्रस्याधिकारत्वात् प्राप्तः समासः वैकल्पिकः। अतः 'नित्यं क्रीडाजीविकयोः' इति सूत्रेण क्रीडार्थे नित्यसमासस्य विधानं भवति।

जीविकायां दन्तलेखकः इत्यस्मिन् उदाहरणे दन्तानां लेखनेन जीवति इत्यस्वपदविग्रहः। लिखेः कर्तरि ण्वुल्, अकादेशे च 'जीविका' शब्दः निष्पन्नः। अतः 'तृजकाभ्यां कर्तरि' इति सूत्रेण अत्र समासस्य निषेधापत्तिः। किन्तु नित्यं क्रीडाजीविकयोः इति सूत्रेण निषेधस्य बाधो भूत्वा अपवादरूपेण नित्य समासो भवति।

**पूर्वपराधरोत्तरमेकदेशिनैकाधिकरणे २/२/१-**

इदं सूत्रं 'षष्ठी' इति सूत्रस्य अपवादभूतमस्ति। अस्मिन् सूत्रे तत्पुरुषः इति सूत्रात् तत्पुरुष इति पदमनुवर्तते। सह सुपा इति सुप्, 'सुबामन्त्रिते पराङ्गवत्स्वरे' इत्यतः सुप् विभाषा इति सूत्रतः विभाषा इति पदस्य अनुवृत्तिर्भवति। तेन सूत्रार्थो भवति-अवयविना सह पूर्वादयः समस्यन्ते, एकत्व सङ्ख्याविशिष्टः चेदवयवी।

'पूर्वापराधरोत्तमम्' इति समहारद्वन्द्वात् प्रथमैकवचनम्। एकदेशशब्दः अवयवे रूढः। एकदेशः अस्यास्ति इत्येकदेशी अवयवी, तेनेति लभ्यते। अधिकरणं द्रव्यम्। एकमधिकरणम् एकाधिकरणम्। एकत्वविशिष्टद्रव्ये वर्तमानेन अवयविवाचकसुबन्तेन पूर्वापराधरोत्तरशब्दाः सुबन्ताः समस्यन्ते, स तत्पुरुष

इत्यर्थः अस्ति। ननु पूर्वश्चासौ कायश्चेति कर्मधारयेण एव पूर्वकाय इत्यादि सिद्धम्। भक्त्या कायशब्दस्य कायावयववाचित्वेन समानाधिकरण्योपपत्तेः इत्यत आह सिद्धान्तकौमुद्याम्–षष्ठीसमासापवाद इति। पूर्व कायस्येति विग्रहे 'षष्ठी' इति सूत्रेण समासे सति षष्ठ्यन्तस्य समासविधौ 'प्रथमानिर्दिष्टं समास उपसर्जनम् इति सूत्रेण प्रथमानिर्दिष्टत्वात् पूर्वनिपातः स्यात्। तन्निवृत्त्यर्थमिदं वचनमिति अर्थः अस्ति।

पूर्वकायः इत्यस्मिन् उदाहरणे पूर्वं कायस्य इति विग्रहवाक्यम्। अर्धमिति गम्यं विशेष्याभिप्रायं नपुंसकत्वम्। 'तस्य परमाम्रेडितम्' इति निर्देशादौ अवयववृत्तिदिक्शब्दयोगे पञ्चमी अभावात् षष्ठी। पूर्वशब्दस्य समासविधौ प्रथमानिर्दिष्टत्वात् पूर्वनिपातः। 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति पुंस्त्वम्। यत्र उत्सर्गापवादौ महाविभाषया विकल्प्येते तत्रापवादेन मुक्ते पुनरुत्सर्गे न प्रवर्तते इति। ततश्च एकदेशिसमासाभावे षष्ठी समासो न भवति।

एवं अपरकायः इत्यस्मिन् उदाहरणे 'अपरं कायस्य' इति विग्रहः अस्ति। अत्रापि 'षष्ठी' इति सूत्रेण समासः प्राप्तः किन्तु 'पूर्वपराधरोत्तरः' इति सूत्रेण तस्य सूत्रस्य बाधो भवति। यदि षष्ठी इति सूत्रेण समासो भवेत् तर्हि कायपूर्वम् कायअपरम् इति रूपे भवेताम्। यतो हि 'षष्ठी' इत्यस्मिन् सूत्रे षष्ठी इति प्रथमान्तं पदमस्ति। तेन प्रथमानिर्दिष्टं समास उपर्जनम् इति सूत्रेण पूर्वकायः इत्यादिषु षष्ठ्यन्तं पदं उपसर्जनं भवेत्। तन्न भवेत् एतदर्थ 'षष्ठी' इति सूत्रस्य अपवादरूपे 'पूर्वपराधरोत्तरमेकदेशिनैकाधिकरणे' इति सूत्रेण समासो भवति। अनेन सूत्रेण पूर्वं कायस्य अपरं कायस्य इत्यादि उदाहरणेषु 'पूर्वम्' 'अपरम्' एतयोः पदयोः उपसर्जनसंज्ञा भवति। ततः उपसर्जनं पूर्वम् इत्यनेन तयोः पूर्वप्रयोगोऽपि भवति।

अतः पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे इति सूत्रं 'षष्ठी' इति सूत्रस्य अपवादं भूत्वा समासं विदधाति।